# Avadhuta Gita

# અવધૂત ગીતા

## Document Information

Text title : Avadhuta Gita

File name : avadhutagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Author : Rishi Dattatreya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, Nira Zafrir-Bursztyn nirazb at yahoo

Description-comments : A classic poem of Absolute Non-Dual Philosophy

Latest update : September 13, 2000, December 30, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 30, 2022

*sanskritdocuments.org*

# અવધૂત ગીતા

## અથ પ્રથમોऽધ્યાયઃ

ઈશ્વરાનુગ્રહાદેવ પુંસામદ્વૈતવાસના ।
મહદ્ભયપરિત્રાણાદ્વિપ્રાણામુપજાયતે ॥ ૧॥

યેનેદં પૂરિતં સર્વમાત્મનૈવાત્મનાત્મનિ ।
નિરાકારં કથં વન્દે હ્યભિન્નં શિવમવ્યયમ્ ॥ ૨॥

પઞ્ચભૂતાત્મકં વિશ્વં મરીચિજલસન્નિભમ્ ।
કસ્યાપ્યહો નમસ્કુર્યામહમેકો નિરઞ્જનઃ ॥ ૩॥

આત્મૈવ કેવલં સર્વં ભેદાભેદો ન વિદ્યતે ।
અસ્તિ નાસ્તિ કથં બ્રૂયાં વિસ્મયઃ પ્રતિભાતિ મે ॥ ૪॥

વેદાન્તસારસર્વસ્વં જ્ઞાનં વિજ્ઞાનમેવ ચ ।
અહમાત્મા નિરાકારઃ સર્વવ્યાપી સ્વભાવતઃ ॥ ૫॥

યો વૈ સર્વાત્મકો દેવો નિષ્કલો ગગનોપમઃ ।
સ્વભાવનિર્મલઃ શુદ્ધઃ સ એવાયં ન સંશયઃ ॥ ૬॥

અહમેવાવ્યયોऽનન્તઃ શુદ્ધવિજ્ઞાનવિગ્રહઃ ।
સુખં દુઃખં ન જાનામિ કથં કસ્યાપિ વર્તતે ॥ ૭॥

ન માનસં કર્મ શુભાશુભં મે
  ન કાયિકં કર્મ શુભાશુભં મે ।
ન વાચિકં કર્મ શુભાશુભં મે
  જ્ઞાનામૃતં શુદ્ધમતીન્દ્રિયોऽહમ્ ॥ ૮॥

મનો વૈ ગગનાકારં મનો વૈ સર્વતોમુખમ્ ।
મનોऽતીતં મનઃ સર્વં ન મનઃ પરમાર્થતઃ ॥ ૯॥

અહમેકમિદં સર્વં વ્યોમાતીતં નિરન્તરમ્ ।

પશ્યામિ કથમાત્માનં પ્રત્યક્ષં વા તિરોહિતમ્ ॥ ૧૦॥

ત્વમેવમેકં હિ કથં ન બુધ્યસે
  સમં હિ સર્વેષુ વિમૃષ્ટમવ્યયમ્ ।
સદોદિતોઽસિ ત્વમખણ્ડિતઃ પ્રભો
  દિવા ચ નક્તં ચ કથં હિ મન્યસે ॥ ૧૧॥

આત્માનં સતતં વિદ્ધિ સર્વત્રૈકં નિરન્તરમ્ ।
અહં ધ્યાતા પરં ધ્યેયમખણ્ડં ખણ્ડ્યતે કથમ્ ॥ ૧૨॥

ન જાતો ન મૃતોઽસિ ત્વં ન તે દેહઃ કદાચન ।
સર્વં બ્રહ્મેતિ વિખ્યાતં બ્રવીતિ બહુધા શ્રુતિઃ ॥ ૧૩॥

સ બાહ્યાભ્યન્તરોઽસિ ત્વં શિવઃ સર્વત્ર સર્વદા ।
ઇતસ્તતઃ કથં ભ્રાન્તઃ પ્રધાવસિ પિશાચવત્ ॥ ૧૪॥

સંયોગશ્ચ વિયોગશ્ચ વર્તતે ન ચ તે ન મે ।
ન ત્વં નાહં જગન્નેદં સર્વમાત્મૈવ કેવલમ્ ॥ ૧૫॥

શબ્દાદિપઞ્ચકસ્યાસ્ય નૈવાસિ ત્વં ન તે પુનઃ ।
ત્વમેવ પરમં તત્ત્વમતઃ કિં પરિતપ્યસે ॥ ૧૬॥

જન્મ મૃત્યુર્ન તે ચિત્તં બન્ધમોક્ષૌ શુભાશુભૌ ।
કથં રોદિષિ રે વત્સ નામરૂપં ન તે ન મે ॥ ૧૭॥

અહો ચિત્ત કથં ભ્રાન્તઃ પ્રધાવસિ પિશાચવત્ ।
અભિન્નં પશ્ય ચાત્માનં રાગત્યાગાત્સુખી ભવ ॥ ૧૮॥

ત્વમેવ તત્ત્વં હિ વિકારવર્જિતં
  નિષ્કમ્પમેકં હિ વિમોક્ષવિગ્રહમ્ ।
ન તે ચ રાગો હ્યથવા વિરાગઃ
  કથં હિ સન્તપ્યસિ કામકામતઃ ॥ ૧૯॥

વદન્તિ શ્રુતયઃ સર્વાઃ નિર્ગુણં શુદ્ધમવ્યયમ્ ।
અશરીરં સમં તત્ત્વં તન્માં વિદ્ધિ ન સંશયઃ ॥ ૨૦॥

સાકારમનૃતં વિદ્ધિ નિરાકારં નિરન્તરમ્ ।
એતત્તત્ત્વોપદેશેન ન પુનર્ભવસમ્ભવઃ ॥ ૨૧॥

એકમેવ સમં તત્ત્વં વદન્તિ હિ વિપશ્ચિતઃ ।

રાગત્યાગાત્પુનશ્ચિત્તમેકાનેકં ન વિદ્યતે ॥ ૨૨॥

અનાત્મરૂપં ચ કથં સમાધિ-
    રાત્મસ્વરૂપં ચ કથં સમાધિઃ ।
અસ્તીતિ નાસ્તીતિ કથં સમાધિ-
    ર્મોક્ષસ્વરૂપં યદિ સર્વમેકમ્ ॥ ૨૩॥

વિશુદ્ધોઽસિ સમં તત્ત્વં વિદેહસ્ત્વમજોઽવ્યયઃ ।
જાનામીહ ન જાનામીત્યાત્માનં મન્યસે કથમ્ ॥ ૨૪॥

તત્ત્વમસ્યાદિવાક્યેન સ્વાત્મા હિ પ્રતિપાદિતઃ ।
નેતિ નેતિ શ્રુતિર્બ્રૂયાદનૃતં પાઞ્ચભૌતિકમ્ ॥ ૨૫॥

આત્મન્યેવાત્મના સર્વં ત્વયા પૂર્ણં નિરન્તરમ્ ।
ધ્યાતા ધ્યાનં ન તે ચિત્તં નિર્લજ્જં ધ્યાયતે કથમ્ ॥ ૨૬॥

શિવં ન જાનામિ કથં વદામિ
    શિવં ન જાનામિ કથં ભજામિ ।
અહં શિવશ્ચેત્પરમાર્થતત્ત્વં
    સમસ્વરૂપં ગગનોપમં ચ ॥ ૨૭॥

નાહં તત્ત્વં સમં તત્ત્વં કલ્પનાહેતુવર્જિતમ્ ।
ગ્રાહ્યગ્રાહકનિર્મુક્તં સ્વસંવેદ્યં કથં ભવેત્ ॥ ૨૮॥

અનન્તરૂપં ન હિ વસ્તુ કિઞ્ચિ-
    ત્તત્ત્વસ્વરૂપં ન હિ વસ્તુ કિઞ્ચિત્ ।
આત્મૈકરૂપં પરમાર્થતત્ત્વં
    ન હિંસકો વાપિ ન ચાપ્યહિંસા ॥ ૨૯॥

વિશુદ્ધોઽસિ સમં તત્ત્વં વિદેહમજમવ્યયમ્ ।
વિભ્રમં કથમાત્માર્થે વિભ્રાન્તોઽહં કથં પુનઃ ॥ ૩૦॥

ઘટે ભિન્ને ઘટાકાશં સુલીનં ભેદવર્જિતમ્ ।
શિવેન મનસા શુદ્ધો ન ભેદઃ પ્રતિભાતિ મે ॥ ૩૧॥

ન ઘટો ન ઘટાકાશો ન જીવો જીવવિગ્રહઃ ।
કેવલં બ્રહ્મ સંવિદ્ધિ વેદ્યવેદકવર્જિતમ્ ॥ ૩૨॥

સર્વત્ર સર્વદા સર્વમાત્માનં સતતં ધ્રુવમ્ ।

સર્વં શૂન્યમશૂન્યં ચ તન્માં વિદ્ધિ ન સંશયઃ ॥ ૩૩॥

વેદા ન લોકા ન સુરા ન યજ્ઞા
    વર્ણાશ્રમો નૈવ કુલં ન જાતિઃ ।
ન ધૂમમાર્ગો ન ચ દીપ્તિમાર્ગો
    બ્રહ્મૈકરૂપં પરમાર્થતત્ત્વમ્ ॥ ૩૪॥

વ્યાપ્યવ્યાપકનિર્મુક્તઃ ત્વમેકઃ સફલં યદિ ।
પ્રત્યક્ષં ચાપરોક્ષં ચ હ્યાત્માનં મન્યસે કથમ્ ॥ ૩૫॥

અદ્વૈતં કેચિદિચ્છન્તિ દ્વૈતમિચ્છન્તિ ચાપરે ।
સમં તત્ત્વં ન વિન્દન્તિ દ્વૈતાદ્વૈતવિવર્જિતમ્ ॥ ૩૬॥

શ્વેતાદિવર્ણરહિતં શબ્દાદિગુણવર્જિતમ્ ।
કથયન્તિ કથં તત્ત્વં મનોવાચામગોચરમ્ ॥ ૩૭॥

યદાઽનૃતમિદં સર્વં દેહાદિગગનોપમમ્ ।
તદા હિ બ્રહ્મ સંવેત્તિ ન તે દ્વૈતપરમ્પરા ॥ ૩૮॥

પરેણ સહજાત્માપિ હ્યભિન્નઃ પ્રતિભાતિ મે ।
વ્યોમાકારં તથૈવૈકં ધ્યાતા ધ્યાનં કથં ભવેત્ ॥ ૩૯॥

યત્કરોમિ યદશ્નામિ યજ્જુહોમિ દદામિ યત્ ।
એતત્સર્વં ન મે કિઞ્ચિદ્વિશુદ્ધોઽહમજોઽવ્યયઃ ॥ ૪૦॥

સર્વં જગદ્વિદ્ધિ નિરાકૃતીદં
    સર્વં જગદ્વિદ્ધિ વિકારહીનમ્ ।
સર્વં જગદ્વિદ્ધિ વિશુદ્ધદેહં
    સર્વં જગદ્વિદ્ધિ શિવૈકરૂપમ્ ॥ ૪૧॥

તત્ત્વં ત્વં ન હિ સન્દેહઃ કિં જાનામ્યથવા પુનઃ ।
અસંવેદ્યં સ્વસંવેદ્યમાત્માનં મન્યસે કથમ્ ॥ ૪૨॥

માયાઽમાયા કથં તાત છાયાઽછાયા ન વિદ્યતે ।
તત્ત્વમેકમિદં સર્વં વ્યોમાકારં નિરઞ્જનમ્ ॥ ૪૩॥

આદિમધ્યાન્તમુક્તોઽહં ન બદ્ધોઽહં કદાચન ।
સ્વભાવનિર્મલઃ શુદ્ધ ઇતિ મે નિશ્ચિતા મતિઃ ॥ ૪૪॥

મહદાદિ જગત્સર્વં ન કિઞ્ચિત્પ્રતિભાતિ મે ।

બ્રહ્મૈવ કેવલં સર્વં કથં વર્ણાશ્રમસ્થિતિઃ ॥ ૪૫॥

જાનામિ સર્વથા સર્વમહમેકો નિરન્તરમ્ ।
નિરાલમ્બમશૂન્યં ચ શૂન્યં વ્યોમાદિપઞ્ચકમ્ ॥ ૪૬॥

ન ષણ્ઢો ન પુમાન્ન સ્ત્રી ન બોધો નૈવ કલ્પના ।
સાનન્દો વા નિરાનન્દમાત્માનં મન્યસે કથમ્ ॥ ૪૭॥

ષડઙ્ગયોગાન્ન તુ નૈવ શુદ્ધં
 મનોવિનાશાન્ન તુ નૈવ શુદ્ધમ્ ।
ગુરૂપદેશાન્ન તુ નૈવ શુદ્ધં
 સ્વયં ચ તત્ત્વં સ્વયમેવ બુદ્ધમ્ ॥ ૪૮॥

ન હિ પઞ્ચાત્મકો દેહો વિદેહો વર્તતે ન હિ ।
આત્મૈવ કેવલં સર્વં તુરીયં ચ ત્રયં કથમ્ ॥ ૪૯॥

ન બદ્ધો નૈવ મુક્તોઽહં ન ચાહં બ્રહ્મણઃ પૃથક્ ।
ન કર્તા ન ચ ભોક્તાહં વ્યાપ્યવ્યાપકવર્જિતઃ ॥ ૫૦॥

યથા જલં જલે ન્યસ્તં સલિલં ભેદવર્જિતમ્ ।
પ્રકૃતિં પુરુષં તદ્વદભિન્નં પ્રતિભાતિ મે ॥ ૫૧॥

યદિ નામ ન મુક્તોઽસિ ન બદ્ધોઽસિ કદાચન ।
સાકારં ચ નિરાકારમાત્માનં મન્યસે કથમ્ ॥ ૫૨॥

જાનામિ તે પરં રૂપં પ્રત્યક્ષં ગગનોપમમ્ ।
યથા પરં હિ રૂપં યન્મરીચિજલસન્નિભમ્ ॥ ૫૩॥

ન ગુરુર્નોપદેશશ્ચ ન ચોપાધિર્ન મે ક્રિયા ।
વિદેહં ગગનં વિદ્ધિ વિશુદ્ધોઽહં સ્વભાવતઃ ॥ ૫૪॥

વિશુદ્ધોઽસ્ય શરીરોઽસિ ન તે ચિત્તં પરાત્પરમ્ ।
અહં ચાત્મા પરં તત્ત્વમિતિ વક્તું ન લજ્જસે ॥ ૫૫॥

કથં રોદિષિ રે ચિત્ત હ્યાત્મૈવાત્માત્મના ભવ ।
પિબ વત્સ કલાતીતમદ્વૈતં પરમામૃતમ્ ॥ ૫૬॥

નૈવ બોધો ન ચાબોધો ન બોધાબોધ એવ ચ ।
યસ્યેદૃશઃ સદા બોધઃ સ બોધો નાન્યથા ભવેત્ ॥ ૫૭॥

જ્ઞાનં ન તર્કો ન સમાધિયોગો

ન દેશકાલૌ ન ગુરૂપદેશઃ ।
સ્વભાવસંવિત્તરહં ચ તત્ત્વ-
માકાશકલ્પં સહજં ધ્રુવં ચ ॥ ૫૮॥

ન જાતોઽહં મૃતો વાપિ ન મે કર્મ શુભાશુભમ્ ।
વિશુદ્ધં નિર્ગુણં બ્રહ્મ બન્ધો મુક્તિઃ કથં મમ ॥ ૫૯॥

યદિ સર્વગતો દેવઃ સ્થિરઃ પૂર્ણો નિરન્તરઃ ।
અન્તરં હિ ન પશ્યામિ સ બાહ્યાભ્યન્તરઃ કથમ્ ॥ ૬૦॥

સ્ફુરત્યેવ જગત્કૃત્સ્નમખણ્ડિતનિરન્તરમ્ ।
અહો માયામહામોહો દ્વૈતાદ્વૈતવિકલ્પના ॥ ૬૧॥

સાકારં ચ નિરાકારં નેતિ નેતીતિ સર્વદા ।
ભેદાભેદવિનિર્મુક્તો વર્તતે કેવલઃ શિવઃ ॥ ૬૨॥

ન તે ચ માતા ચ પિતા ચ બન્ધુઃ
ન તે ચ પત્ની ન સુતશ્ચ મિત્રમ્ ।
ન પક્ષપાતી ન વિપક્ષપાતઃ
કથં હિ સન્તપ્તિરિયં હિ ચિત્તે ॥ ૬૩॥

દિવા નક્તં ન તે ચિત્તં ઉદયાસ્તમયૌ ન હિ ।
વિદેહસ્ય શરીરત્વં કલ્પયન્તિ કથં બુધાઃ ॥ ૬૪॥

નાવિભક્તં વિભક્તં ચ ન હિ દુઃખસુખાદિ ચ ।
ન હિ સર્વમસર્વં ચ વિદ્ધિ ચાત્માનમવ્યયમ્ ॥ ૬૫॥

નાહં કર્તા ન ભોક્તા ચ ન મે કર્મ પુરાઽધુના ।
ન મે દેહો વિદેહો વા નિર્મમેતિ મમેતિ કિમ્ ॥ ૬૬॥

ન મે રાગાદિકો દોષો દુઃખં દેહાદિકં ન મે ।
આત્માનં વિદ્ધિ મામેકં વિશાલં ગગનોપમમ્ ॥ ૬૭॥

સખે મનઃ કિં બહુજલ્પિતેન
સખે મનઃ સર્વમિદં વિતર્ક્યમ્ ।
યત્સારભૂતં કથિતં મયા તે
ત્વમેવ તત્ત્વં ગગનોપમોઽસિ ॥ ૬૮॥

યેન કેનાપિ ભાવેન યત્ર કુત્ર મૃતા અપિ ।

યોગિનસ્તત્ર લીયન્તે ઘટાકાશમિવામ્બરે ॥ ૬૯॥

તીર્થે ચાન્ત્યજગેહે વા નષ્ટસ્મૃતિરપિ ત્યજન્ ।
સમકાલે તનું મુક્તઃ કૈવલ્યવ્યાપકો ભવેત્ ॥ ૭૦॥

ધર્માર્થકામમોક્ષાંશ્ચ દ્વિપદાદિચરાચરમ્ ।
મન્યન્તે યોગિનઃ સર્વં મરીચિજલસન્નિભમ્ ॥ ૭૧॥

અતીતાનાગતં કર્મ વર્તમાનં તથૈવ ચ ।
ન કરોમિ ન ભુઞ્જામિ ઇતિ મે નિશ્ચલા મતિઃ ॥ ૭૨॥

શૂન્યાગારે સમરસપૂત-
    સ્તિષ્ઠન્નેકઃ સુખમવધૂતઃ ।
ચરતિ હિ નગ્નસ્ત્યક્ત્વા ગર્વં
    વિન્દતિ કેવલમાત્મનિ સર્વમ્ ॥ ૭૩॥

ત્રિતયતુરીયં ન હિ નહિ યત્ર
    વિન્દતિ કેવલમાત્મનિ તત્ર ।
ધર્માધર્મૌ ન હિ નહિ યત્ર
    બદ્ધો મુક્તઃ કથમિહ તત્ર ॥ ૭૪॥

વિન્દતિ વિન્દતિ ન હિ નહિ મન્ત્રં
    છન્દોલક્ષણં ન હિ નહિ તન્ત્રમ્ ।
સમરસમગ્નો ભાવિતપૂતઃ
    પ્રલપિતમેતત્પરમવધૂતઃ ॥ ૭૫॥

સર્વશૂન્યમશૂન્યં ચ સત્યાસત્યં ન વિદ્યતે ।
સ્વભાવભાવતઃ પ્રોક્તં શાસ્ત્રસંવિત્તિપૂર્વકમ્ ॥ ૭૬॥

ઇતિ પ્રથમોઽધ્યાયઃ ॥ ૧॥

## અથ દ્વિતીયોઽધ્યાયઃ

બાલસ્ય વા વિષયભોગરતસ્ય વાપિ
    મૂર્ખસ્ય સેવકજનસ્ય ગૃહસ્થિતસ્ય ।
એતદ્ગુરોઃ કિમપિ નૈવ ન ચિન્તનીયં
    રત્નં કથં ત્યજતિ કોઽપ્યશુચૌ પ્રવિષ્ટમ્ ॥ ૧॥

નૈવાત્ર કાવ્યગુણ એવ તુ ચિન્તનીયો
    ગ્રાહ્યઃ પરં ગુણવતા ખલુ સાર એવ ।
સિન્દૂરચિત્રરહિતા ભુવિ રૂપશૂન્યા
    પારં ન કિં નયતિ નૌરિહ ગન્તુકામાન્ ॥ ૨॥

પ્રયત્નેન વિના યેન નિશ્ચલેન ચલાચલમ્ ।
ગ્રસ્તં સ્વભાવતઃ શાન્તં ચૈતન્યં ગગનોપમમ્ ॥ ૩॥

અયત્નાચ્છાલયેદ્યસ્તુ એકમેવ ચરાચરમ્ ।
સર્વગં તત્કથં ભિન્નમદ્વૈતં વર્તતે મમ ॥ ૪॥

અહમેવ પરં યસ્માત્સારાત્સારતરં શિવમ્ ।
ગમાગમવિનિર્મુક્તં નિર્વિકલ્પં નિરાકુલમ્ ॥ ૫॥

સર્વાવયવનિર્મુક્તં તથાહં ત્રિદશાર્ચિતમ્ ।
સમ્પૂર્ણત્વાન્ન ગૃહ્ણામિ વિભાગં ત્રિદશાદિકમ્ ॥ ૬॥

પ્રમાદેન ન સન્દેહઃ કિં કરિષ્યામિ વૃત્તિમાન્ ।
ઉત્પદ્યન્તે વિલીયન્તે બુદ્બુદાશ્ચ યથા જલે ॥ ૭॥

મહદાદીનિ ભૂતાનિ સમાપ્યૈવં સદૈવ હિ ।
મૃદુદ્રવ્યેષુ તીક્ષ્ણેષુ ગુડેષુ કટુકેષુ ચ ॥ ૮॥

કટુત્વં ચૈવ શૈત્યત્વં મૃદુત્વં ચ યથા જલે ।
પ્રકૃતિઃ પુરુષસ્તદ્વદભિન્નં પ્રતિભાતિ મે ॥ ૯॥

સર્વાખ્યારહિતં યદ્યત્સૂક્ષ્માત્સૂક્ષ્મતરં પરમ્ ।
મનોબુદ્ધીન્દ્રિયાતીતમકલઙ્કં જગત્પતિમ્ ॥ ૧૦॥

ઈદૃશં સહજં યત્ર અહં તત્ર કથં ભવેત્ ।
ત્વમેવ હિ કથં તત્ર કથં તત્ર ચરાચરમ્ ॥ ૧૧॥

ગગનોપમં તુ યત્પ્રોક્તં તદેવ ગગનોપમમ્ ।
ચૈતન્યં દોષહીનં ચ સર્વજ્ઞં પૂર્ણમેવ ચ ॥ ૧૨॥

પૃથિવ્યાં ચરિતં નૈવ મારુતેન ચ વાહિતમ્ ।
વરિણા પિહિતં નૈવ તેજોમધ્યે વ્યવસ્થિતમ્ ॥ ૧૩॥

આકાશં તેન સંવ્યાપ્તં ન તદ્વ્યાપ્તં ચ કેનચિત્ ।
સ બાહ્યાભ્યન્તરં તિષ્ઠત્યવચ્છિન્નં નિરન્તરમ્ ॥ ૧૪॥

સૂક્ષ્મત્વાત્તદદૃશ્યત્વાન્નિર્ગુણત્વાચ્ચ યોગિભિઃ ।
આલમ્બનાદિ યત્પ્રોક્તં ક્રમાદાલમ્બનં ભવેત્ ॥ ૧૫॥

સતતાઽભ્યાસયુક્તસ્તુ નિરાલમ્બો યદા ભવેત્ ।
તલ્લયાલ્લીયતે નાન્તર્ગુણદોષવિવર્જિતઃ ॥ ૧૬॥

વિષવિશ્વસ્ય રૌદ્રસ્ય મોહમૂર્ચ્છાપ્રદસ્ય ચ ।
એકમેવ વિનાશાય હ્યમોઘં સહજામૃતમ્ ॥ ૧૭॥

ભાવગમ્યં નિરાકારં સાકારં દૃષ્ટિગોચરમ્ ।
ભાવાભાવવિનિર્મુક્તમન્તરાલં તદુચ્યતે ॥ ૧૮॥

બાહ્યભાવં ભવેદ્વિશ્વમન્તઃ પ્રકૃતિરુચ્યતે ।
અન્તરાદન્તરં જ્ઞેયં નારિકેલફલામ્બુવત્ ॥ ૧૯॥

ભ્રાન્તિજ્ઞાનં સ્થિતં બાહ્યં સમ્યગ્જ્ઞાનં ચ મધ્યગમ્ ।
મધ્યાન્મધ્યતરં જ્ઞેયં નારિકેલફલામ્બુવત્ ॥ ૨૦॥

પૌર્ણમાસ્યાં યથા ચન્દ્ર એક એવાતિનિર્મલઃ ।
તેન તત્સદૃશં પશ્યેદ્દ્વિધાદૃષ્ટિર્વિપર્યયઃ ॥ ૨૧॥

અનેનૈવ પ્રકારેણ બુદ્ધિભેદો ન સર્વગઃ ।
દાતા ચ ધીરતામેતિ ગીયતે નામકોટિભિઃ ॥ ૨૨॥

ગુરુપ્રજ્ઞાપ્રસાદેન મૂર્ખો વા યદિ પણ્ડિતઃ ।
યસ્તુ સમ્બુધ્યતે તત્ત્વં વિરક્તો ભવસાગરાત્ ॥ ૨૩॥

રાગદ્વેષવિનિર્મુક્તઃ સર્વભૂતહિતે રતઃ ।
દૃઢબોધશ્ચ ધીરશ્ચ સ ગચ્છેત્પરમં પદમ્ ॥ ૨૪॥

ઘટે ભિન્ને ઘટાકાશ આકાશે લીયતે યથા ।
દેહાભાવે તથા યોગી સ્વરૂપે પરમાત્મનિ ॥ ૨૫॥

ઉક્તેયં કર્મયુક્તાનાં મતિર્યાન્તેઽપિ સા ગતિઃ ।
ન ચોક્તા યોગયુક્તાનાં મતિર્યાન્તેઽપિ સા ગતિઃ ॥ ૨૬॥

યા ગતિઃ કર્મયુક્તાનાં સા ચ વાગિન્દ્રિયાદ્વદેત્ ।
યોગિનાં યા ગતિઃ ક્વાપિ હ્યકથ્યા ભવતોર્જિતા ॥ ૨૭॥

એવં જ્ઞાત્વા ત્વમું માર્ગં યોગિનાં નૈવ કલ્પિતમ્ ।
વિકલ્પવર્જનં તેષાં સ્વયં સિદ્ધિઃ પ્રવર્તતે ॥ ૨૮॥

તીર્થે વાન્ત્યજગેહે વા યત્ર કુત્ર મૃતોऽપિ વા ।
ન યોગી પશ્યતે ગર્ભં પરે બ્રહ્મણિ લીયતે ॥ ૨૯॥

સહજમજમચિન્ત્યં યસ્તુ પશ્યેત્સ્વરૂપં
ઘટતિ યદિ યથેષ્ટં લિપ્યતે નૈવ દોષૈઃ ।
સકૃદપિ તદભાવાત્કર્મ કિઞ્ચિન્નકુર્યાત્
તદપિ ન ચ વિબદ્ધઃ સંયમી વા તપસ્વી ॥ ૩૦॥

નિરામયં નિષ્પ્રતિમં નિરાકૃતિં
નિરાશ્રયં નિર્વપુષં નિરાશિષમ્ ।
નિર્દ્વન્દ્વનિર્મોહમલુપ્તશક્તિકં
તમીશમાત્માનમુપૈતિ શાશ્વતમ્ ॥ ૩૧॥

વેદો ન દીક્ષા ન ચ મુણ્ડનક્રિયા
ગુરુર્ન શિષ્યો ન ચ યન્ત્રસમ્પદઃ ।
મુદ્રાદિકં ચાપિ ન યત્ર ભાસતે
તમીશમાત્માનમુપૈતિ શાશ્વતમ્ ॥ ૩૨॥

ન શામ્ભવં શાક્તિકમાનવં ન વા
પિણ્ડં ચ રૂપં ચ પદાદિકં ન વા ।
આરમ્ભનિષ્પત્તિઘટાદિકં ચ નો
તમીશમાત્માનમુપૈતિ શાશ્વતમ્ ॥ ૩૩॥

યસ્ય સ્વરૂપાત્સચરાચરં જગ-
દુત્પદ્યતે તિષ્ઠતિ લીયતેऽપિ વા ।
પયોવિકારાદિવ ફેનબુદ્બુદા-
સ્તમીશમાત્માનમુપૈતિ શાશ્વતમ્ ॥ ૩૪॥

નાસાનિરોધો ન ચ દૃષ્ટિરાસનં
બોધોऽપ્યબોધોऽપિ ન યત્ર ભાસતે ।
નાડીપ્રચારોऽપિ ન યત્ર કિઞ્ચિ-
ત્તમીશમાત્માનમુપૈતિ શાશ્વતમ્ ॥ ૩૫॥

નાનાત્વમેકત્વમુભત્વમન્યતા
અણુત્વદીર્ઘત્વમહત્ત્વશૂન્યતા ।
માનત્વમેયત્વસમત્વવર્જિતં

તમીશમાત્માનમુપૈતિ શાશ્વતમ્ ॥ ૩૬॥

સુસંયમી વા યદિ વા ન સંયમી
સુસઙ્ગ્રહી વા યદિ વા ન સઙ્ગ્રહી ।
નિષ્કર્મકો વા યદિ વા સકર્મક-
સ્તમીશમાત્માનમુપૈતિ શાશ્વતમ્ ॥ ૩૭॥

મનો ન બુદ્ધિર્ન શરીરમિન્દ્રિયં
તન્માત્રભૂતાનિ ન ભૂતપઞ્ચકમ્ ।
અહઙ્કૃતિશ્ચાપિ વિયત્સ્વરૂપકં
તમીશમાત્માનમુપૈતિ શાશ્વતમ્ ॥ ૩૮॥

વિધૌ નિરોધે પરમાત્મતાં ગતે
ન યોગિનશ્ચેતસિ ભેદવર્જિતે ।
શૌચં ન વાશૌચમલિઙ્ગભાવના
સર્વં વિધેયં યદિ વા નિષિધ્યતે ॥ ૩૯॥

મનો વચો યત્ર ન શક્તમીરિતું
નૂનં કથં તત્ર ગુરૂપદેશતા ।
ઇમાં કથામુક્તવતો ગુરોસ્ત-
દ્યુક્તસ્ય તત્ત્વં હિ સમં પ્રકાશતે ॥ ૪૦॥

ઇતિ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

## અથ તૃતીયોઽધ્યાયઃ

ગુણવિગુણવિભાગો વર્તતે નૈવ કિઞ્ચિત્
રતિવિરતિવિહીનં નિર્મલં નિષ્પ્રપઞ્ચમ્ ।
ગુણવિગુણવિહીનં વ્યાપકં વિશ્વરૂપં
કથમહમિહ વન્દે વ્યોમરૂપં શિવં વૈ ॥ ૧॥

શ્વેતાદિવર્ણરહિતો નિયતં શિવશ્ચ
કાર્યં હિ કારણમિદં હિ પરં શિવશ્ચ ।
એવં વિકલ્પરહિતોઽહમલં શિવશ્ચ
સ્વાત્માનમાત્મનિ સુમિત્ર કથં નમામિ ॥ ૨॥

નિર્મૂલમૂલરહિતો હિ સદોદિતોઽહં

નિર્ધૂમધૂમરહિતો હિ સદોદિતોઽહમ્ ।
નિર્દીપદીપરહિતો હિ સદોદિતોઽહં
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૩॥

નિષ્કામકામમિહ નામ કથં વદામિ
નિઃસઙ્ગસઙ્ગમિહ નામ કથં વદામિ ।
નિઃસારસારરહિતં ચ કથં વદામિ
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૪॥

અદ્વૈતરૂપમખિલં હિ કથં વદામિ
દ્વૈતસ્વરૂપમખિલં હિ કથં વદામિ ।
નિત્યં ત્વનિત્યમખિલં હિ કથં વદામિ
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૫॥

સ્થૂલં હિ નો ન હિ કૃશં ન ગતાગતં હિ
આદ્યન્તમધ્યરહિતં ન પરાપરં હિ ।
સત્યં વદામિ ખલુ વૈ પરમાર્થતત્ત્વં
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૬॥

સંવિદ્ધિ સર્વકરણાનિ નભોનિભાનિ
સંવિદ્ધિ સર્વવિષયાંશ્ચ નભોનિભાંશ્ચ ।
સંવિદ્ધિ ચૈકમમલં ન હિ બન્ધમુક્તં
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૭॥

દુર્બોધબોધગહનો ન ભવામિ તાત
દુર્લક્ષ્યલક્ષ્યગહનો ન ભવામિ તાત ।
આસન્નરૂપગહનો ન ભવામિ તાત
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૮॥

નિષ્કર્મકર્મદહનો જ્વલનો ભવામિ
નિર્દુઃખદુઃખદહનો જ્વલનો ભવામિ ।
નિર્દેહદેહદહનો જ્વલનો ભવામિ
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૯॥

નિષ્પાપપાપદહનો હિ હુતાશનોઽહં
નિર્ધર્મધર્મદહનો હિ હુતાશનોઽહમ્ ।
નિર્બન્ધબન્ધદહનો હિ હુતાશનોઽહં

    જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૧૦॥

નિર્ભાવભાવરહિતો ન ભવામિ વત્સ
    નિર્યોગયોગરહિતો ન ભવામિ વત્સ ।
નિશ્ચિત્તચિત્તરહિતો ન ભવામિ વત્સ
    જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૧૧॥

નિર્મોહમોહપદવીતિ ન મે વિકલ્પો
    નિઃશોકશોકપદવીતિ ન મે વિકલ્પઃ ।
નિર્લોભલોભપદવીતિ ન મે વિકલ્પો
    જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૧૨॥

સંસારસન્તતિલતા ન ચ મે કદાચિત્
    સન્તોષસન્તતિસુખો ન ચ મે કદાચિત્ ।
અજ્ઞાનબન્ધનમિદં ન ચ મે કદાચિત્
    જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૧૩॥

સંસારસન્તતિરજો ન ચ મે વિકારઃ
    સન્તાપસન્તતિતમો ન ચ મે વિકારઃ ।
સત્ત્વં સ્વધર્મજનકં ન ચ મે વિકારો
    જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૧૪॥

સન્તાપદુઃખજનકો ન વિધિઃ કદાચિત્
    સન્તાપયોગજનિતં ન મનઃ કદાચિત્ ।
યસ્માદહઙ્કૃતિરિયં ન ચ મે કદાચિત્
    જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૧૫॥

નિષ્કમ્પકમ્પનિધનં ન વિકલ્પકલ્પં
    સ્વપ્નપ્રબોધનિધનં ન હિતાહિતં હિ ।
નિઃસારસારનિધનં ન ચરાચરં હિ
    જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૧૬॥

નો વેદ્યવેદકમિદં ન ચ હેતુતર્ક્યં
    વાચામગોચરમિદં ન મનો ન બુદ્ધિઃ ।
એવં કથં હિ ભવતઃ કથયામિ તત્ત્વં
    જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૧૭॥

નિર્ભિન્નભિન્નરહિતં પરમાર્થતત્ત્વ-
મન્તર્બહિર્ન હિ કથં પરમાર્થતત્ત્વમ્ ।
પ્રાક્સમ્ભવં ન ચ રતં ન હિ વસ્તુ કિઞ્ચિત્
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૧૮॥

રાગાદિદોષરહિતં ત્વહમેવ તત્ત્વં
દૈવાદિદોષરહિતં ત્વહમેવ તત્ત્વમ્ ।
સંસારશોકરહિતં ત્વહમેવ તત્ત્વં
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૧૯॥

સ્થાનત્રયં યદિ ચ નેતિ કથં તુરીયં
કાલત્રયં યદિ ચ નેતિ કથં દિશશ્ચ ।
શાન્તં પદં હિ પરમં પરમાર્થતત્ત્વં
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૨૦॥

દીર્ઘો લઘુઃ પુનરિતીહ નમે વિભાગો
વિસ્તારસંકટમિતીહ ન મે વિભાગઃ ।
કોણં હિ વર્તુલમિતીહ ન મે વિભાગો
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૨૧॥

માતાપિતાદિ તનયાદિ ન મે કદાચિત્
જાતં મૃતં ન ચ મનો ન ચ મે કદાચિત્ ।
નિર્વ્યાકુલં સ્થિરમિદં પરમાર્થતત્ત્વં
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૨૨॥

શુદ્ધં વિશુદ્ધમવિચારમનન્તરૂપં
નિર્લેપલેપમવિચારમનન્તરૂપમ્ ।
નિષ્ખણ્ડખણ્ડમવિચારમનન્તરૂપં
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૨૩॥

બ્રહ્માદયઃ સુરગણાઃ કથમત્ર સન્તિ
સ્વર્ગાદયો વસતયઃ કથમત્ર સન્તિ ।
યદ્યેકરૂપમમલં પરમાર્થતત્ત્વં
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૨૪॥

નિર્નેતિ નેતિ વિમલો હિ કથં વદામિ
નિઃશેષશેષવિમલો હિ કથં વદામિ ।

નિર્લિઙ્ગલિઙ્ગવિમલો હિ કથં વદામિ
    જ્ઞાનામૃતં સમરસં ગગનોપમોऽહમ્ ॥ ૨૫॥

નિષ્કર્મકર્મપરમં સતતં કરોમિ
    નિઃસઙ્ગસઙ્ગરહિતં પરમં વિનોદમ્ ।
નિર્દેહદેહરહિતં સતતં વિનોદં
    જ્ઞાનામૃતં સમરસં ગગનોપમોऽહમ્ ॥ ૨૬॥

માયાપ્રપઞ્ચરચના ન ચ મે વિકારઃ ।
    કૌટિલ્યદમ્ભરચના ન ચ મે વિકારઃ ।
સત્યાનૃતેતિ રચના ન ચ મે વિકારો
    જ્ઞાનામૃતં સમરસં ગગનોપમોऽહમ્ ॥ ૨૭॥

સન્ધ્યાદિકાલરહિતં ન ચ મે વિયોગો-
    હ્યન્તઃ પ્રબોધરહિતં બધિરો ન મૂકઃ ।
એવં વિકલ્પરહિતં ન ચ ભાવશુદ્ધં
    જ્ઞાનામૃતં સમરસં ગગનોપમોऽહમ્ ॥ ૨૮॥

નિર્નાથનાથરહિતં હિ નિરાકુલં વૈ
    નિશ્ચિત્તચિત્તવિગતં હિ નિરાકુલં વૈ ।
સંવિદ્ધિ સર્વવિગતં હિ નિરાકુલં વૈ
    જ્ઞાનામૃતં સમરસં ગગનોપમોऽહમ્ ॥ ૨૯॥

કાન્તારમન્દિરમિદં હિ કથં વદામિ
    સંસિદ્ધસંશયમિદં હિ કથં વદામિ ।
એવં નિરન્તરસમં હિ નિરાકુલં વૈ
    જ્ઞાનામૃતં સમરસં ગગનોપમોऽહમ્ ॥ ૩૦॥

નિર્જીવજીવરહિતં સતતં વિભાતિ
    નિર્બીજબીજરહિતં સતતં વિભાતિ ।
નિર્વાણબન્ધરહિતં સતતં વિભાતિ
    જ્ઞાનામૃતં સમરસં ગગનોપમોऽહમ્ ॥ ૩૧॥

સમ્ભૂતિવર્જિતમિદં સતતં વિભાતિ
    સંસારવર્જિતમિદં સતતં વિભાતિ ।
સંહારવર્જિતમિદં સતતં વિભાતિ
    જ્ઞાનામૃતં સમરસં ગગનોપમોऽહમ્ ॥ ૩૨॥

ઉલ્લેખમાત્રમપિ તે ન ચ નામરૂપં
 નિર્ભિન્નભિન્નમપિ તે ન હિ વસ્તુ કિઞ્ચિત્ ।
નિર્લજ્જમાનસ કરોષિ કથં વિષાદં
 જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૩૩॥

કિં નામ રોદિષિ સખે ન જરા ન મૃત્યુઃ
 કિં નામ રોદિષિ સખે ન ચ જન્મ દુઃખમ્ ।
કિં નામ રોદિષિ સખે ન ચ તે વિકારો
 જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૩૪॥

કિં નામ રોદિષિ સખે ન ચ તે સ્વરૂપં
 કિં નામ રોદિષિ સખે ન ચ તે વિરૂપમ્ ।
કિં નામ રોદિષિ સખે ન ચ તે વયાંસિ
 જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૩૫॥

કિં નામ રોદિષિ સખે ન ચ તે વયાંસિ
 કિં નામ રોદિષિ સખે ન ચ તે મનાંસિ ।
કિં નામ રોદિષિ સખે ન તવેન્દ્રિયાણિ
 જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૩૬॥

કિં નામ રોદિષિ સખે ન ચ તેઽસ્તિ કામઃ
 કિં નામ રોદિષિ સખે ન ચ તે પ્રલોભઃ ।
કિં નામ રોદિષિ સખે ન ચ તે વિમોહો
 જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૩૭॥

ઐશ્વર્યમિચ્છસિ કથં ન ચ તે ધનાનિ
 ઐશ્વર્યમિચ્છસિ કથં ન ચ તે હિ પત્ની ।
ઐશ્વર્યમિચ્છસિ કથં ન ચ તે મમેતિ
 જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૩૮॥

લિઙ્ગપ્રપઞ્ચજનુષી ન ચ તે ન મે ચ
 નિર્લજ્જમાનસમિદં ચ વિભાતિ ભિન્નમ્ ।
નિર્ભેદભેદરહિતં ન ચ તે ન મે ચ
 જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૩૯॥

નો વાણુમાત્રમપિ તે હિ વિરાગરૂપં

નો વાણુમાત્રમપિ તે હિ સરાગરૂપમ્ ।
નો વાણુમાત્રમપિ તે હિ સકામરૂપં
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૪૦॥

ધ્યાતા ન તે હિ હૃદયે ન ચ તે સમાધિ-
ર્ધ્યાનં ન તે હિ હૃદયે ન બહિઃ પ્રદેશઃ ।
ધ્યેયં ન ચેતિ હૃદયે ન હિ વસ્તુ કાલો
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૪૧॥

યત્સારભૂતમખિલં કથિતં મયા તે
ન ત્વં ન મે ન મહતો ન ગુરુર્ન ન શિષ્યઃ ।
સ્વચ્છન્દરૂપસહજં પરમાર્થતત્ત્વં
જ્ઞાનામૃતં સમરસં ગગનોપમોઽહમ્ ॥ ૪૨॥

કથમિહ પરમાર્થં તત્ત્વમાનન્દરૂપં
કથમિહ પરમાર્થં નૈવમાનન્દરૂપમ્ ।
કથમિહ પરમાર્થં જ્ઞાનવિજ્ઞાનરૂપં
યદિ પરમહમેકં વર્તતે વ્યોમરૂપમ્ ॥ ૪૩॥

દહનપવનહીનં વિદ્ધિ વિજ્ઞાનમેક-
મવનિજલવિહીનં વિદ્ધિ વિજ્ઞાનરૂપમ્ ।
સમગમનવિહીનં વિદ્ધિ વિજ્ઞાનમેકં
ગગનમિવ વિશાલં વિદ્ધિ વિજ્ઞાનમેકમ્ ॥ ૪૪॥

ન શૂન્યરૂપં ન વિશૂન્યરૂપં
ન શુદ્ધરૂપં ન વિશુદ્ધરૂપમ્ ।
રૂપં વિરૂપં ન ભવામિ કિઞ્ચિત્
સ્વરૂપરૂપં પરમાર્થતત્ત્વમ્ ॥ ૪૫॥

મુઞ્ચ મુઞ્ચ હિ સંસારં ત્યાગં મુઞ્ચ હિ સર્વથા ।
ત્યાગાત્યાગવિષં શુદ્ધમમૃતં સહજં ધ્રુવમ્ ॥ ૪૬॥

ઇતિ તૃતીયોઽધ્યાયઃ ॥ ૩॥

## અથ ચતુર્થોઽધ્યાયઃ

નાવાહનં નૈવ વિસર્જનં વા
    પુષ્પાણિ પત્રાણિ કથં ભવન્તિ ।
ધ્યાનાનિ મન્ત્રાણિ કથં ભવન્તિ
    સમાસમં ચૈવ શિવાર્ચનં ચ ॥ ૧॥

ન કેવલં બન્ધવિબન્ધમુક્તો
    ન કેવલં શુદ્ધવિશુદ્ધમુક્તઃ ।
ન કેવલં યોગવિયોગમુક્તઃ
    સ વૈ વિમુક્તો ગગનોપમોઽહમ્ ॥ ૨॥

સઞ્જાયતે સર્વમિદં હિ તથ્યં
    સઞ્જાયતે સર્વમિદં વિતથ્યમ્ ।
એવં વિકલ્પો મમ નૈવ જાતઃ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૩॥

ન સાઞ્જનં ચૈવ નિરઞ્જનં વા
    ન ચાન્તરં વાપિ નિરન્તરં વા ।
અન્તર્વિભન્નં ન હિ મે વિભાતિ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૪॥

અબોધબોધો મમ નૈવ જાતો
    બોધસ્વરૂપં મમ નૈવ જાતમ્ ।
નિર્બોધબોધં ચ કથં વદામિ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૫॥

ન ધર્મયુક્તો ન ચ પાપયુક્તો
    ન બન્ધયુક્તો ન ચ મોક્ષયુક્તઃ ।
યુક્તં ત્વયુક્તં ન ચ મે વિભાતિ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૬॥

પરાપરં વા ન ચ મે કદાચિત્
    મધ્યસ્થભાવો હિ ન ચારિમિત્રમ્ ।
હિતાહિતં ચાપિ કથં વદામિ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૭॥

નોપાસકો નૈવમુપાસ્યરૂપં
    ન ચોપદેશો ન ચ મે ક્રિયા ચ ।
સંવિત્સ્વરૂપં ચ કથં વદામિ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૮॥

નો વ્યાપકં વ્યાપ્યમિહાસ્તિ કિઞ્ચિત્
    ન ચાલયં વાપિ નિરાલયં વા ।
અશૂન્યશૂન્યં ચ કથં વદામિ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૯॥

ન ગ્રાહકો ગ્રાહ્યકમેવ કિઞ્ચિત્
    ન કારણં વા મમ નૈવ કાર્યમ્ ।
અચિન્ત્યચિન્ત્યં ચ કથં વદામિ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૧૦॥

ન ભેદકં વાપિ ન ચૈવ ભેદ્યં
    ન વેદકં વા મમ નૈવ વેદ્યમ્ ।
ગતાગતં તાત કથં વદામિ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૧૧॥

ન ચાસ્તિ દેહો ન ચ મે વિદેહો
    બુદ્ધિર્મનો મે ન હિ ચેન્દ્રિયાણિ ।
રાગો વિરાગશ્ચ કથં વદામિ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૧૨॥

ઉલ્લેખમાત્રં ન હિ ભિન્નમુચ્ચૈ-
    રુલ્લેખમાત્રં ન તિરોહિતં વૈ ।
સમાસમં મિત્ર કથં વદામિ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૧૩॥

જિતેન્દ્રિયોઽહં ત્વજિતેન્દ્રિયો વા
    ન સંયમો મે નિયમો ન જાતઃ ।
જયાજયૌ મિત્ર કથં વદામિ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૧૪॥

અમૂર્તમૂર્તિર્ન ચ મે કદાચિ-
    દાદ્યન્તમધ્યં ન ચ મે કદાચિત્ ।

બલાબલં મિત્ર કથં વદામિ
 સ્વરૂપનિર્વાણમનામયોऽહમ્ ॥ ૧૫॥

મૃતામૃતં વાપિ વિષાવિષં ચ
 સઞ્જાયતે તાત ન મે કદાચિત્ ।
અશુદ્ધશુદ્ધં ચ કથં વદામિ
 સ્વરૂપનિર્વાણમનામયોऽહમ્ ॥ ૧૬॥

સ્વપ્નઃ પ્રબોધો ન ચ યોગમુદ્રા
 નક્તં દિવા વાપિ ન મે કદાચિત્ ।
અતુર્યતુર્યં ચ કથં વદામિ
 સ્વરૂપનિર્વાણમનામયોऽહમ્ ॥ ૧૭॥

સંવિદ્ધિ માં સર્વવિસર્વમુક્તં
 માયા વિમાયા ન ચ મે કદાચિત્ ।
સન્ધ્યાદિકં કર્મ કથં વદામિ
 સ્વરૂપનિર્વાણમનામયોऽહમ્ ॥ ૧૮॥

સંવિદ્ધિ માં સર્વસમાધિયુક્તં
 સંવિદ્ધિ માં લક્ષ્યવિલક્ષ્યમુક્તમ્ ।
યોગં વિયોગં ચ કથં વદામિ
 સ્વરૂપનિર્વાણમનામયોऽહમ્ ॥ ૧૯॥

મૂર્ખોऽપિ નાહં ન ચ પણ્ડિતોऽહં
 મૌનં વિમૌનં ન ચ મે કદાચિત્ ।
તર્કં વિતર્કં ચ કથં વદામિ
 સ્વરૂપનિર્વાણમનામયોऽહમ્ ॥ ૨૦॥

પિતા ચ માતા ચ કુલં ન જાતિ-
 ર્જન્માદિ મૃત્યુર્ન ચ મે કદાચિત્ ।
સ્નેહં વિમોહં ચ કથં વદામિ
 સ્વરૂપનિર્વાણમનામયોऽહમ્ ॥ ૨૧॥

અસ્તં ગતો નૈવ સદોદિતોऽહં
 તેજોવિતેજો ન ચ મે કદાચિત્ ।
સન્ધ્યાદિકં કર્મ કથં વદામિ
 સ્વરૂપનિર્વાણમનામયોऽહમ્ ॥ ૨૨॥

અસંશયં વિદ્ધિ નિરાકુલં માં
    અસંશયં વિદ્ધિ નિરન્તરં મામ્ ।
અસંશયં વિદ્ધિ નિરઞ્જનં માં
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૨૩॥

ધ્યાનાનિ સર્વાણિ પરિત્યજન્તિ
    શુભાશુભં કર્મ પરિત્યજન્તિ ।
ત્યાગામૃતં તાત પિબન્તિ ધીરાઃ
    સ્વરૂપનિર્વાણમનામયોઽહમ્ ॥ ૨૪॥

વિન્દતિ વિન્દતિ ન હિ ન હિ યત્ર
    છન્દોલક્ષણં ન હિ ન હિ તત્ર ।
સમરસમગ્નો ભાવિતપૂતઃ
    પ્રલપતિ તત્ત્વં પરમવધૂતઃ ॥ ૨૫॥

ઇતિ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

## અથ પઞ્ચમોધ્યાયઃ

ૐ ઇતિ ગદિતં ગગનસમં તત્
    ન પરાપરસારવિચાર ઇતિ ।
અવિલાસવિલાસનિરાકરણં
    કથમક્ષરબિન્દુસમુચ્ચરણમ્ ॥ ૧॥

ઇતિ તત્ત્વમસિપ્રભૃતિશ્રુતિભિઃ
    પ્રતિપાદિતમાત્મનિ તત્ત્વમસિ ।
ત્વમુપાધિવિવર્જિતસર્વસમં
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૨॥

અધ ઊર્ધ્વવિવર્જિતસર્વસમં
    બહિરન્તરવર્જિતસર્વસમમ્ ।
યદિ ચૈકવિવર્જિતસર્વસમં
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૩॥

ન હિ કલ્પિતકલ્પવિચાર ઇતિ

ન હિ કારણકાર્યવિચાર ઇતિ ।
પદસન્ધિવિવર્જિતસર્વસમં
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૪॥

ન હિ બોધવિબોધસમાધિરિતિ
ન હિ દેશવિદેશસમાધિરિતિ ।
ન હિ કાલવિકાલસમાધિરિતિ
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૫॥

ન હિ કુમ્ભનભો ન હિ કુમ્ભ ઇતિ
ન હિ જીવવપુર્ન હિ જીવ ઇતિ ।
ન હિ કારણકાર્યવિભાગ ઇતિ
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૬॥

ઇહ સર્વનિરન્તરમોક્ષપદં
લઘુદીર્ઘવિચારવિહીન ઇતિ ।
ન હિ વર્તુલકોણવિભાગ ઇતિ
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૭॥

ઇહ શૂન્યવિશૂન્યવિહીન ઇતિ
ઇહ શુદ્ધવિશુદ્ધવિહીન ઇતિ ।
ઇહ સર્વવિસર્વવિહીન ઇતિ
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૮॥

ન હિ ભિન્નવિભિન્નવિચાર ઇતિ
બહિરન્તરસન્ધિવિચાર ઇતિ ।
અરિમિત્રવિવર્જિતસર્વસમં
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૯॥

ન હિ શિષ્યવિશિષ્યસ્વરૂપ ઇતિ
ન ચરાચરભેદવિચાર ઇતિ ।
ઇહ સર્વનિરન્તરમોક્ષપદં
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૧૦॥

નનુ રૂપવિરૂપવિહીન ઇતિ
નનુ ભિન્નવિભિન્નવિહીન ઇતિ ।
નનુ સર્ગવિસર્ગવિહીન ઇતિ

કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૧૧॥

ન ગુણાગુણપાશનિબન્ધ ઇતિ
મૃતજીવનકર્મ કરોમિ કથમ્ ।
ઇતિ શુદ્ધનિરઞ્જનસર્વસમં
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૧૨॥

ઇહ ભાવવિભાવવિહીન ઇતિ
ઇહ કામવિકામવિહીન ઇતિ ।
ઇહ બોધતમં ખલુ મોક્ષસમં
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૧૩॥

ઇહ તત્ત્વનિરન્તરતત્ત્વમિતિ
ન હિ સન્ધિવિસન્ધિવિહીન ઇતિ ।
યદિ સર્વવિવર્જિતસર્વસમં
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૧૪॥

અનિકેતકુટી પરિવારસમં
ઇહસઙ્ગવિસઙ્ગવિહીનપરમ્ ।
ઇહ બોધવિબોધવિહીનપરં
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૧૫॥

અવિકારવિકારમસત્યમિતિ
અવિલક્ષવિલક્ષમસત્યમિતિ ।
યદિ કેવલમાત્મનિ સત્યમિતિ
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૧૬॥

ઇહ સર્વસમં ખલુ જીવ ઇતિ
ઇહ સર્વનિરન્તરજીવ ઇતિ ।
ઇહ કેવલનિશ્ચલજીવ ઇતિ
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૧૭॥

અવિવેકવિવેકમબોધ ઇતિ
અવિકલ્પવિકલ્પમબોધ ઇતિ ।
યદિ ચૈકનિરન્તરબોધ ઇતિ
કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૧૮॥

ન હિ મોક્ષપદં ન હિ બન્ધપદં
    ન હિ પુણ્યપદં ન હિ પાપપદમ્ ।
ન હિ પૂર્ણપદં ન હિ રિક્તપદં
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૧૯॥

યદિ વર્ણવિવર્ણવિહીનસમં
    યદિ કારણકાર્યવિહીનસમમ્ ।
યદિભેદવિભેદવિહીનસમં
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૨૦॥

ઇહ સર્વનિરન્તરસર્વચિતે
    ઇહ કેવલનિશ્ચલસર્વચિતે ।
દ્વિપદાદિવિવર્જિતસર્વચિતે
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૨૧॥

અતિસર્વનિરન્તરસર્વગતં
    અતિનિર્મલનિશ્ચલસર્વગતમ્ ।
દિનરાત્રિવિવર્જિતસર્વગતં
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૨૨॥

ન હિ બન્ધવિબન્ધસમાગમનં
    ન હિ યોગવિયોગસમાગમનમ્ ।
ન હિ તર્કવિતર્કસમાગમનં
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૨૩॥

ઇહ કાલવિકાલનિરાકરણં
    અણુમાત્રકૃશાનુનિરાકરણમ્ ।
ન હિ કેવલસત્યનિરાકરણં
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૨૪॥

ઇહ દેહવિદેહવિહીન ઇતિ
    નનુ સ્વપ્નસુષુપ્તિવિહીનપરમ્ ।
અભિધાનવિધાનવિહીનપરં
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૨૫॥

ગગનોપમશુદ્ધવિશાલસમં
    અતિસર્વવિવર્જિતસર્વસમમ્ ।

ગતસારવિસારવિકારસમં
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૨૬॥

ઇહ ધર્મવિધર્મવિરાગતર-
    મિહ વસ્તુવિવસ્તુવિરાગતરમ્ ।
ઇહ કામવિકામવિરાગતરં
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૨૭॥

સુખદુઃખવિવર્જિતસર્વસમ-
    મિહ શોકવિશોકવિહીનપરમ્ ।
ગુરુશિષ્યવિવર્જિતતત્ત્વપરં
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૨૮॥

ન કિલાઙ્કુરસારવિસાર ઇતિ
    ન ચલાચલસામ્યવિસામ્યમિતિ ।
અવિચારવિચારવિહીનમિતિ
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૨૯॥

ઇહ સારસમુચ્ચયસારમિતિ ।
    કથિતં નિજભાવવિભેદ ઇતિ ।
વિષયે કરણત્વમસત્યમિતિ
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૩૦॥

બહુધા શ્રુતયઃ પ્રવદન્તિ યતો
    વિયદાદિરિદં મૃગતોયસમમ્ ।
યદિ ચૈકનિરન્તરસર્વસમં
    કિમુ રોદિષિ માનસિ સર્વસમમ્ ॥ ૩૧॥

વિન્દતિ વિન્દતિ ન હિ ન હિ યત્ર
    છન્દોલક્ષણં ન હિ ન હિ તત્ર ।
સમરસમગ્નો ભાવિતપૂતઃ
    પ્રલપતિ તત્ત્વં પરમવધૂતઃ ॥ ૩૨॥

ઇતિ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

## અથ ષષ્ઠમોઽધ્યાયઃ

બહુધા શ્રુતયઃ પ્રવદન્તિ વયં
    વિયદાદિરિદં મૃગતોયસમમ્ ।
યદિ ચૈકનિરન્તરસર્વશિવ-
    મુપમેયમથોહ્યુપમા ચ કથમ્ ॥ ૧॥

અવિભક્તિવિભક્તિવિહીનપરં
    નનુ કાર્યવિકાર્યવિહીનપરમ્ ।
યદિ ચૈકનિરન્તરસર્વશિવં
    યજનં ચ કથં તપનં ચ કથમ્ ॥ ૨॥

મન એવ નિરન્તરસર્વગતં
    હ્યવિશાલવિશાલવિહીનપરમ્ ।
મન એવ નિરન્તરસર્વશિવં
    મનસાપિ કથં વચસા ચ કથમ્ ॥ ૩॥

દિનરાત્રિવિભેદનિરાકરણ-
    મુદિતાનુદિતસ્ય નિરાકરણમ્ ।
યદિ ચૈકનિરન્તરસર્વશિવં
    રવિચન્દ્રમસૌ જ્વલનશ્ચ કથમ્ ॥ ૪॥

ગતકામવિકામવિભેદ ઇતિ
    ગતચેષ્ટવિચેષ્ટવિભેદ ઇતિ ।
યદિ ચૈકનિરન્તરસર્વશિવં
    બહિરન્તરભિન્નમતિશ્ચ કથમ્ ॥ ૫॥

યદિ સારવિસારવિહીન ઇતિ
    યદિ શૂન્યવિશૂન્યવિહીન ઇતિ ।
યદિ ચૈકનિરન્તરસર્વશિવં
    પ્રથમં ચ કથં ચરમં ચ કથમ્ ॥ ૬॥

યદિભેદવિભેદનિરાકરણં
    યદિ વેદકવેદ્યનિરાકરણમ્ ।
યદિ ચૈકનિરન્તરસર્વશિવં
    તૃતીયં ચ કથં તુરીયં ચ કથમ્ ॥ ૭॥

ગદિતાવિદિતં ન હિ સત્યમિતિ
વિદિતાવિદિતં ન હિ સત્યમિતિ ।
યદિ ચૈકનિરન્તરસર્વશિવં
વિષયેન્દ્રિયબુદ્ધિમનાંસિ કથમ્ ॥ ૮॥

ગગનં પવનો ન હિ સત્યમિતિ
ધરણી દહનો ન હિ સત્યમિતિ ।
યદિ ચૈકનિરન્તરસર્વશિવં
જલદશ્ચ કથં સલિલં ચ કથમ્ ॥ ૯॥

યદિ કલ્પિતલોકનિરાકરણં
યદિ કલ્પિતદેવનિરાકરણમ્ ।
યદિ ચૈકનિરન્તરસર્વશિવં
ગુણદોષવિચારમતિશ્ચ કથમ્ ॥ ૧૦॥

મરણામરણં હિ નિરાકરણં
કરણાકરણં હિ નિરાકરણમ્ ।
યદિ ચૈકનિરન્તરસર્વશિવં
ગમનાગમનં હિ કથં વદતિ ॥ ૧૧॥

પ્રકૃતિઃ પુરુષો ન હિ ભેદ ઇતિ
ન હિ કારણકાર્યવિભેદ ઇતિ ।
યદિ ચૈકનિરન્તરસર્વશિવં
પુરુષાપુરુષં ચ કથં વદતિ ॥ ૧૨॥

તૃતીયં ન હિ દુઃખસમાગમનં
ન ગુણાદ્વિતીયસ્ય સમાગમનમ્ ।
યદિ ચૈકનિરન્તરસર્વશિવં
સ્થવિરશ્ચ યુવા ચ શિશુશ્ચ કથમ્ ॥ ૧૩॥

નનુ આશ્રમવર્ણવિહીનપરં
નનુ કારણકર્તૃવિહીનપરમ્ ।
યદિ ચૈકનિરન્તરસર્વશિવ-
મવિનષ્ટવિનષ્ટમતિશ્ચ કથમ્ ॥ ૧૪॥

ગ્રસિતાગ્રસિતં ચ વિતથ્યમિતિ
જનિતાજનિતં ચ વિતથ્યમિતિ ।

યદિ ચૈકનિરન્તરસર્વશિવ-
    મવિનાશિ વિનાશિ કથં હિ ભવેત્ ॥ ૧૫॥

પુરુષાપુરુષસ્ય વિનષ્ટમિતિ
    વનિતાવનિતસ્ય વિનષ્ટમિતિ ।
યદિ ચૈકનિરન્તરસર્વશિવ-
    મવિનોદવિનોદમતિશ્ચ કથમ્ ॥ ૧૬॥

યદિ મોહવિષાદવિહીનપરો
    યદિ સંશયશોકવિહીનપરઃ ।
યદિ ચૈકનિરન્તરસર્વશિવ-
    મહમત્ર મમેતિ કથં ચ પુનઃ ॥ ૧૭॥ મહમેતિ

નનુ ધર્મવિધર્મવિનાશ ઇતિ
    નનુ બન્ધવિબન્ધવિનાશ ઇતિ ।
યદિ ચૈકનિરન્તરસર્વશિવં-
    મિહદુઃખવિદુઃખમતિશ્ચ કથમ્ ॥ ૧૮॥

ન હિ યાજ્ઞિકયજ્ઞવિભાગ ઇતિ
    ન હુતાશનવસ્તુવિભાગ ઇતિ ।
યદિ ચૈકનિરન્તરસર્વશિવં
    વદ કર્મફલાનિ ભવન્તિ કથમ્ ॥ ૧૯॥

નનુ શોકવિશોકવિમુક્ત ઇતિ
    નનુ દર્પવિદર્પવિમુક્ત ઇતિ ।
યદિ ચૈકનિરન્તરસર્વશિવં
    નનુ રાગવિરાગમતિશ્ચ કથમ્ ॥ ૨૦॥

ન હિ મોહવિમોહવિકાર ઇતિ
    ન હિ લોભવિલોભવિકાર ઇતિ ।
યદિ ચૈકનિરન્તરસર્વશિવં
    હ્યવિવેકવિવેકમતિશ્ચ કથમ્ ॥ ૨૧॥

ત્વમહં ન હિ હન્ત કદાચિદપિ
    કુલજાતિવિચારમસત્યમિતિ ।
અહમેવ શિવઃ પરમાર્થ ઇતિ
    અભિવાદનમત્ર કરોમિ કથમ્ ॥ ૨૨॥

ગુરુશિષ્યવિચારવિશીર્ણ ઇતિ
ઉપદેશવિચારવિશીર્ણ ઇતિ ।
અહમેવ શિવઃ પરમાર્થ ઇતિ
અભિવાદનમત્ર કરોમિ કથમ્ ॥ ૨૩॥

ન હિ કલ્પિતદેહવિભાગ ઇતિ
ન હિ કલ્પિતલોકવિભાગ ઇતિ ।
અહમેવ શિવઃ પરમાર્થ ઇતિ
અભિવાદનમત્ર કરોમિ કથમ્ ॥ ૨૪॥

સરજો વિરજો ન કદાચિદપિ
નનુ નિર્મલનિશ્ચલશુદ્ધ ઇતિ ।
અહમેવ શિવઃ પરમાર્થ ઇતિ
અભિવાદનમત્ર કરોમિ કથમ્ ॥ ૨૫॥

ન હિ દેહવિદેહવિકલ્પ ઇતિ
અનૃતં ચરિતં ન હિ સત્યમિતિ ।
અહમેવ શિવઃ પરમાર્થ ઇતિ
અભિવાદનમત્ર કરોમિ કથમ્ ॥ ૨૬॥

વિન્દતિ વિન્દતિ ન હિ ન હિ યત્ર
છન્દોલક્ષણં ન હિ ન હિ તત્ર ।
સમરસમગ્નો ભાવિતપૂતઃ
પ્રલપતિ તત્ત્વં પરમવધૂતઃ ॥ ૨૭॥

ઇતિ ષષ્ઠમોઽધ્યાયઃ ॥ ૬॥

## અથ સપ્તમોઽધ્યાયઃ

રથ્યાકર્પટવિરચિતકન્થઃ
પુણ્યાપુણ્યવિવર્જિતપન્થઃ ।
શૂન્યાગારે તિષ્ઠતિ નગ્નો
શુદ્ધનિરઞ્જનસમરસમગ્નઃ ॥ ૧॥

લક્ષ્યાલક્ષ્યવિવર્જિતલક્ષ્યો

યુક્તાયુક્તવિવર્જિતદક્ષઃ ।
કેવલતત્ત્વનિરઞ્જનપૂતો
વાદવિવાદઃ કથમવધૂતઃ ॥ ૨॥

આશાપાશવિબન્ધનમુક્તાઃ
શૌચાચારવિવર્જિતયુક્તાઃ ।
એવં સર્વવિવર્જિતશાન્તા-
સ્તત્ત્વં શુદ્ધનિરઞ્જનવન્તઃ ॥ ૩॥

કથમિહ દેહવિદેહવિચારઃ
કથમિહ રાગવિરાગવિચારઃ ।
નિર્મલનિશ્ચલગગનાકારં
સ્વયમિહ તત્ત્વં સહજાકારમ્ ॥ ૪॥

કથમિહ તત્ત્વં વિન્દતિ યત્ર
રૂપમરૂપં કથમિહ તત્ર ।
ગગનાકારઃ પરમો યત્ર
વિષયીકરણં કથમિહ તત્ર ॥ ૫॥

ગગનાકારનિરન્તરહંસ-
સ્તત્ત્વવિશુદ્ધનિરઞ્જનહંસઃ ।
એવં કથમિહ ભિન્નવિભિન્નં
બન્ધવિબન્ધવિકારવિભિન્નમ્ ॥ ૬॥

કેવલતત્ત્વનિરન્તરસર્વં
યોગવિયોગૌ કથમિહ ગર્વમ્ ।
એવં પરમનિરન્તરસર્વ-
મેવં કથમિહ સારવિસારમ્ ॥ ૭॥

કેવલતત્ત્વનિરઞ્જનસર્વં
ગગનાકારનિરન્તરશુદ્ધમ્ ।
એવં કથમિહ સઙ્ગવિસઙ્ગં
સત્યં કથમિહ રઙ્ગવિરઙ્ગમ્ ॥ ૮॥

યોગવિયોગૈ રહિતો યોગી
ભોગવિભોગૈ રહિતો ભોગી ।
એવં ચરતિ હિ મન્દં મન્દં

મનસા કલ્પિતસહજાનન્દમ્ ॥ ૯॥

બોધવિબોધૈઃ સતતં યુક્તો
દ્વૈતાદ્વૈતૈઃ કથમિહ મુક્તઃ ।
સહજો વિરજઃ કથમિહ યોગી
શુદ્ધનિરઞ્જનસમરસભોગી ॥ ૧૦॥

ભગ્નાભગ્નવિવર્જિતભગ્નો
લગ્નાલગ્નવિવર્જિતલગ્નઃ ।
એવં કથમિહ સારવિસારઃ
સમરસતત્ત્વં ગગનાકારઃ ॥ ૧૧॥

સતતં સર્વવિવર્જિતયુક્તઃ
સર્વં તત્ત્વવિવર્જિતમુક્તઃ ।
એવં કથમિહ જીવિતમરણં
ધ્યાનાધ્યાનૈઃ કથમિહ કરણમ્ ॥ ૧૨॥

ઇન્દ્રજાલમિદં સર્વં યથા મરુમરીચિકા ।
અખણ્ડિતમનાકારો વર્તતે કેવલઃ શિવઃ ॥ ૧૩॥

ધર્માદૌ મોક્ષપર્યન્તં નિરીહાઃ સર્વથા વયમ્ ।
કથં રાગવિરાગૈશ્ચ કલ્પયન્તિ વિપશ્ચિતઃ ॥ ૧૪॥

વિન્દતિ વિન્દતિ ન હિ ન હિ યત્ર
છન્દોલક્ષણં ન હિ ન હિ તત્ર ।
સમરસમગ્નો ભાવિતપૂતઃ
પ્રલપતિ તત્ત્વં પરમવધૂતઃ ॥ ૧૫॥

ઇતિ સપ્તમોऽધ્યાયઃ ॥ ૭॥

## અથ અષ્ટમોऽધ્યાયઃ

ત્વદ્યાત્રયા વ્યાપકતા હતા તે
ધ્યાનેન ચેતઃપરતા હતા તે ।
સ્તુત્યા મયા વાક્પરતા હતા તે
ક્ષમસ્વ નિત્યં ત્રિવિધાપરાધાન્ ॥ ૧॥

કામૈરહતધીર્દાન્તો મૃદુઃ શુચિરકિઞ્ચનઃ ।
અનીહો મિતભુક્ શાન્તઃ સ્થિરો મચ્છરણો મુનિઃ ॥ ૨॥

અપ્રમત્તો ગભીરાત્મા ધૃતિમાન્ જિતષડ્ગુણઃ ।
અમાની માનદઃ કલ્પો મૈત્રઃ કારુણિકઃ કવિઃ ॥ ૩॥

કૃપાલુરકૃતદ્રોહસ્તિતિક્ષુઃ સર્વદેહિનામ્ ।
સત્યસારોઽનવદ્યાત્મા સમઃ સર્વોપકારકઃ ॥ ૪॥

અવધૂતલક્ષણં વર્ણૈર્જ્ઞાતવ્યં ભગવત્તમૈઃ ।
વેદવર્ણાર્થતત્ત્વજ્ઞૈર્વેદવેદાન્તવાદિભિઃ ॥ ૫॥

આશાપાશવિનિર્મુક્ત આદિમધ્યાન્તનિર્મલઃ ।
આનન્દે વર્તતે નિત્યમકારં તસ્ય લક્ષણમ્ ॥ ૬॥

વાસના વર્જિતા યેન વક્તવ્યં ચ નિરામયમ્ ।
વર્તમાનેષુ વર્તેત વકારં તસ્ય લક્ષણમ્ ॥ ૭॥

ધૂલિધૂસરગાત્રાણિ ધૂતચિત્તો નિરામયઃ ।
ધારણાધ્યાનનિર્મુક્તો ધૂકારસ્તસ્ય લક્ષણમ્ ॥ ૮॥

તત્ત્વચિન્તા ધૃતા યેન ચિન્તાચેષ્ટાવિવર્જિતઃ ।
તમોઽહંકારનિર્મુક્તસ્તકારસ્તસ્ય લક્ષણમ્ ॥ ૯॥

દત્તાત્રેયાવધૂતેન નિર્મિતાનન્દરૂપિણા ।
યે પઠન્તિ ચ શ‍ૃણ્વન્તિ તેષાં નૈવ પુનર્ભવઃ ॥ ૧૦॥

ઇતિ અષ્ટમોઽધ્યાયઃ ॥ ૮॥

ઇતિ અવધૂતગીતા સમાપ્તા ॥

Encoded by Sunder Hattangadi
Proofread by Sunder Hattangadi, Nira Zafrir-Bursztyn

As an observation, the composer has used his
licence numerous times to fit the meter -
eg he has used mAnasi 30 times; prefix vi-
to indicate absence or negative of words
such as - -mokSha, -shUnya, -mAyA, -maunam,

-sarva, -bodha,  -kAma, -bhoga, -lobha etc.

---

*Avadhuta Gita*

pdf was typeset on December 30, 2022

Please send corrections to *sanskrit@cheerful.com*